केन्द्रीय विद्यालय संगठन, जयपुर संभाग

सत्रान्त-परीक्षा (SESSION ENDING EXAM 2025- 2026)

**कक्षा- सप्तमी**

**प्रतिदर्श प्रश्न पत्र**

**समयः 2 ½ होराः** पूर्णाङ्काः **60** **विषय- संस्कृतम्**

छात्रस्य नाम-________________________ अनुक्रमाङ्कः____________

कक्षा – सप्तमी वर्ग - ____________

परीक्षकस्य हस्ताक्षर -:__________________ निरीक्षकस्य हस्ताक्षर - ______________

**निर्देशा:-**

- प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एव लेखनीयानि।
- लेखने स्वच्छता स्पष्टता च स्यात्।
- उत्तराणि अस्यामेव उत्तरपुस्तिकायां निर्दिष्ट स्थाने लेखितव्यानि ।
- समस्ताः प्रश्नाः अनिवार्याः सन्ति ।

**खण्ड क- अपठित-अवबोधनम् (8)**

1. **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत – (8)**

प्रात: काल: अतीव मधुर: काल: भवति। यदा स्वच्छे आकाशे सूर्य: उदेति तदा अन्धकार: दूरं गच्छति। सर्वत्र प्रकाश: एव प्रकाश: भवति। पक्षिण: यत्र-तत्र न भ्रमन्ति अपितु मधुरेण स्वरेण मधुरं गीतं गायन्ति। सरोवरेषु कमलानि वाटिकाषु विभिन्नानि पुष्पाणि विकसन्ति। तेषु भ्रमरा: सानन्दं विचरन्ति। शीतल: वायु: वहति | सम्पूर्णं वातावरणं सुगन्धमयं भवति। भ्रमणशीला: प्रसन्ना: जना: वाटिकासु भ्रमन्ति। अनेके बाला: अपि वाटिकासु यत्र–तत्र भ्रमन्ति क्रीडन्ति च। ते अतीव प्रसन्ना: भवन्ति। पशव: अपि प्रसन्ना: भवन्ति। सर्वे जना: स्वकार्येषु संलग्ना: भविष्यन्ति। एषा सुखदायिनी प्रभातवेला जनान् स्वकर्तव्यस्य पाठं पाठयति | धन्या एषा प्रभातवेला।

**I. एकपदेन उत्तरत -** 2x1= 2

(क) प्रात: काल: कीदृशः भवति ? उत्तर-______________

(ख) सर्वत्र कः एव भवति ? उत्तर-______________

**II. पूर्णवाक्येन उत्तरत -** 2x2= 4

(क) भ्रमणशीला: प्रसन्ना: जना: कुत्र भ्रमन्ति ?

उत्तर-________________________________________

(ख) सरोवरेषु वाटिकाषु च कानि विकसन्ति ?

उत्तर-________________________________________

**III. भाषिककार्यम् -** 2x1=2

(क) "जना: भ्रमन्ति" अत्र **कर्तापदम्** किम् अस्ति ?

(अ) भ्रमन्ति (ब) जना: (स) संलग्ना: (द) एषा

(ख) सर्वत्र प्रकाश: एव प्रकाश: भवति । अत्र **अन्धकार:** इतिपदस्य विलोम पदम् किम् अस्ति ?

(अ) भवति (ब) एव (स) सर्वत्र (द) प्रकाश:

**खण्ड ख – रचनात्मक-लेखनम् (12)**

2. **पट्टिकां दृष्ट्वा प्रश्नानाम् उत्तराणि लिखन्तु ।** 4x1=4




(क) सप्ताहस्य कतमः दिवसः रविवासरः अस्ति ?

उत्तरः______________________________

(ख) सप्ताहस्य षष्ठः दिवसः कः ?

उत्तरः______________________________

(ग) सप्ताहस्य कतमः दिवसः शनिवासरः अस्ति ?

उत्तरः______________________________

(घ) सप्ताहस्य अन्तिमः दिवसः कः अस्ति ?

उत्तरः______________________________

**3.** **मञ्जूषां पश्यन्तु, उत्तरं लिखन्तु –** 4x1=4




यथा- आङ्ग्लमासेषु प्रथमः मासः **जनवरी मासः** अस्ति ।

मार्च मासः **तृतीय मासः** अस्ति ।

(क) फरवरीमासः ____________________ मासः अस्ति ।

(ख) आङ्ग्लमासेषु अष्टमः मासः ____________________ ।

(ग) सितम्बरमासः ____________________ मासः अस्ति ।

(घ) आङ्ग्लमासेषु अन्तिमः मासः ________________।

**4.** **अधः प्रदत्तानि वाक्यानि पठित्वा मातृभाषाया/प्रान्तीयभाषाया/आङ्ग्लभाषाया वा अनुवादं कुर्वन्तु ।** 4x1=4

(क) सन्दीप कार्यालयात् गृहं गतवान् ।

उत्तरः ________________________________________________

(ख) भगिनी दूरात् वाहनं पश्यति ।

उत्तरः ________________________________________________

(ग) मित्रं शालायाः गृहम् आगतवान् ।

उत्तरः ________________________________________________

(घ) बालः कपाटिकायाः धनं स्वीकरोति ।

उत्तरः ________________________________________________

## खण्ड ग – अनुप्रयुक्त-व्याकरणम् (16)

**5.** **पठ् धातु लङ् लकार रूप लिखतु** 4x½=2

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुष | अपठत् | | अपठन् |
| मध्यम पुरुष | | अपठतम् | |
| उत्तम पुरुष | अपठम् | | अपठाम |

| | | |
|---|---|---|
| 6. | **अधोलिखिते गद्यांशे अङ्कानां स्थाने संख्यावाचकशब्दान् लिखन्तु ।**<br>यथा- (१) पाठशाला – एका पाठशाला ।<br>एका पाठशाला अस्ति । तत्र ______________(3) अध्यापकाः सन्ति ।<br>साहित्यकक्षायां विंशतिः छात्राः सन्ति । एकस्मिन् दिने _________(1) निरीक्षकः आगतवान् ।<br>तस्मिन् दिने साहित्यकक्षायां __________ (15) छात्राः उपस्थिताः । ____________(5)<br>अनुपस्थिताः । निरीक्षकः दश शब्दान् लेखितुम् उक्तवान् ।__________ (2) छात्रौ सप्त शब्दान्<br>सम्यक् लिखितवन्तौ । एकः छात्रः सर्वान् अपि दश शब्दान् सम्यक् लिखितवान् ।<br>अवशिष्टाः_________ (12) छात्राः नव शब्दान् सम्यक् लिखितवन्तः । | 6x½=<br>3 |
| 7. | **पट्टिकातः समुचितानि पदानि चित्वा विशेषणानुसारं विशेष्यपदं लिखन्तु ।**<br>गजाय \| वृक्षान् \| पाठशालां \| मार्गः \| तटस्य \| युवती<br>(क) सुदीर्घः -<br>(ख) सुन्दरी -<br>(ग) उन्नतान् -<br>(घ) विशालां -<br>(ङ) स्थूलाय -<br>(च) तस्य - | 6x½=<br>3 |
| 8. | **उदाहरणानुसारम् अधः प्रदत्तानां पदानां सन्धिं कुर्वन्तु ।**<br>यथा – विद्या + अभ्यासः = विद्याभ्यासः<br>(क) मम + अपि = ________________<br>(ख) विद्या + अर्थी = ________________<br>(ग) सह + अनुभूतिः = ________________<br>(घ) कवि + इन्द्रः = ________________ | 4x1=4 |

9. **उदाहरणानुसारम् अधः प्रदत्तानां शब्दानां वचनपरिवर्तनं कुर्वन्तु ।** 4x1=4

| शब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| **आहार** | आहारात् | आहाराभ्याम् | आहारेभ्यः |
| **मनुष्य** | | | |
| **अग्नि** | अग्नेः | अग्निभ्याम् | अग्निभ्यः |
| **मुनि** | | | |
| **पेटिका** | पेटिकायाः | पेटिकाभ्याम् | पेटिकाभ्यः |
| **वाटिका** | | | |
| **कूपी** | कूप्याः | कूपीभ्याम् | कूपीभ्यः |
| **नदी** | | | |

## खण्ड घ. पठित अवबोधनम् (अंका: 24)

10. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत** **(5)**

एकदा दश बालकाः स्नानाय नदीम् अगच्छन् । ते नदीजले चिरं स्नानम् अकुर्वन् । ततः ते तीर्त्वा पारं गताः । तदा तेषां नायक: अपृच्छत् – अपि सर्वे बालकाः नदीम् उत्तीर्णाः ? तदा कश्चित् बालकः सर्वान् पङ्क्तौ स्थापयित्वा अगणयत् – एकं द्वे, त्रीणि चत्वारि, पञ्च, षट्, सप्त, अष्ट, नव इति । सः आत्मानं न अगणयत् । अतः सः अवदत् – अरे वयं नव एव स्मः भोः! दशमः नास्ति । अपरः अपि बालकः पुनः आत्मानं त्यक्त्वा अन्यान् बालकान् अगणयत् । तदा अपि नव एव आसन् । अतः ते निश्चयम् अकुर्वन् यत् दशमः नद्यां . मग्नः। ते विषण्णाः तूष्णीम् अतिष्ठन् ।

**अ )एकपदेन उत्तरत** 2x1=2

क) कति बालका : स्नातुम् गता: ? उत्तर- _______________

ख ) कतम : बालक: नद्याम् मग्न: इति निश्चयम् अकुर्वन्? उत्तर- _______________

**ब) पूर्ण वाक्येन उत्तरत –** 2x1=2

क ) ते किं निश्चयं अकुर्वन ?

उत्तर-_______________________________________________

ख) तेषां नायक: किम् अपृच्छत् ?

उत्तर-_______________________________________________

<table>
<tr><td></td><td>स) यथा निर्देशम् तथा उत्तरत्-<br>क) अन्यान् बालकान् अगणयत । <u>अगणयत</u> इत्यास्मिन् पदे किं लकारम्?<br>(अ) लट् लकार (ब) लृट् लकार (स) लङ् लकार (द) लोट् लकार<br><br>ख) अतः ते निश्चयम् अकुर्वन् यत् दशमः नद्यां . मग्नः। अस्मिन् पदे <u>क्रियापदम्</u> किं?<br>(अ) अतः (ब) ते (स) दशमः (द) अकुर्वन्</td><td>2x½=<br>1</td></tr>
<tr><td>11</td><td>अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत (5)<br>यस्तु क्रियावान् पुरुष: स विद्वान्<br>शरीरमाद्यं खलु धर्मसाधनम्<br>शीलं परं भूषणम्<br>सुखार्थिनः कुतो विद्या, कुतो विद्यार्थिनः सुखम्<br>हितं मनोहारि च दुर्लभं वच:<br>मा ब्रूहि दीनं वच:<br><br>क. एकपदेन उत्तरत-<br>(i) कीदृशं वच: मा ब्रूहि? उत्तर - ____________<br>(ii) श्रेष्ठम् आभूषणं किम् अस्ति ? उत्तर - ____________<br>ख. पूर्णवाक्येन उत्तरत-<br>(i) क: विद्वान् अस्ति ?<br>उत्तर- ________________________________________<br>________________________________________<br>(ii) कीदृशं वचनं दुर्लभम् ?<br>उत्तर- ________________________________________<br>________________________________________<br>ग) यथा निर्देशम् तथा उत्तरत्-<br>i) '<u>शीलं परं भूषणम्</u>' अस्मिन् पदे <u>भूषणम्</u>' शब्दस्य किम् अर्थम् ?<br>(अ) चरित्र (ब) आभूषण (स) श्रेष्ठ (द) सुख<br>ii) कुतो विद्यार्थिनः सुखम्। अत्र <u>सुखम्</u> इतिपदस्य विलोम पदम् किम् अस्ति ?<br>(अ) प्रसन्नं (ब) शीलं (स) दु:खं (द) स्वर्गः</td><td>2x1=<br>2<br><br>2x1=<br>2<br><br>2x½=<br>1</td></tr>
</table>

| | | |
|---|---|---|
| 12. | **उदाहरणानुसारं रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुर्वन्तु ।**<br>यथा- <u>महाराणासङ्ग्रामसिंहस्य</u> भ्राता पृथ्वीराजः ।<br>प्रश्न- कस्य भ्राता पृथ्वीराज: ?<br><br>(क) <u>**सः**</u> अचिन्तयत् ।<br>उत्तर: ______________________________?<br>(ख) <u>**शयनस्थाने**</u> चन्दनं शायितवती ।<br>उत्तर: ______________________________?<br>(ग) <u>**राष्ट्रहितं**</u> श्रेष्ठम् ।<br>उत्तर: ______________________________? | 3x1=3 |
| 13. | **अधोलिखितानि वाक्यानि पठित्वा 'आम्' अथवा 'न' इति वदन्तु लिखन्तु च ।**<br>(क) किं वयं पृथिव्याः पुत्राः पुत्र्यः च स्म: । उत्तरः ____________<br>(ख) किं रत्नम् अन्विष्यति । उत्तरः ____________<br>(ग) किं शीलं श्रेष्ठम् आभूषणम् अस्ति । उत्तरः ____________<br>(घ) किं शरीरम् आद्यं धर्मसाधनम् । उत्तरः ____________<br>(ङ) किं गुणानां सर्वदा एव आदरः भवति । उत्तरः ____________<br>(च) किं क्रियाशीलः एव विद्वान् भवति । उत्तरः ____________ | 6x½=<br>3 |
| 14. | **अधः प्रदत्तनां प्रश्नानाम् एकपदेन उत्तराणि लिखन्तु -**<br>(क) सर्वेषां मनुष्याणां माता का अस्ति ? उत्तरः ____________<br>(ख) बनवीरः कं मारयितुम् कुतन्त्रम् अरचयत् ? उत्तरः ____________<br>(ग) महाराणाप्रतापः केषां हृदये चिरं स्थानं प्राप्नोत् ? उत्तरः ____________ | 3x1=3 |

| | | |
|---|---|---|
| 15. | **अधोलिखितानि पदानि परस्परं मेलयन्तु ।**<br>(क) हान्दुमान् – सावरकरः<br>(ख) कालापानी – जनजातिः<br>(ग) जारवा – सेल्युलरकारागारः<br>(घ) स्वातन्त्र्यवीरः – अण्डमानः | 4x½=<br>2 |
| 16. | **पट्टिकातः चित्वा उचितं पदं पूरयन्तु –**<br>कोकिलः \| चाषः \| वायसः \| नकुलः \| शिखी<br>(क) ___________ त्रिमात्रकालं ध्वनिं करोति।<br>(ख) _____________ द्विमात्रकालं ध्वनिं करोति।<br>(ग) _______________एकमात्रकालं ध्वनिं करोति। | 3x1=3 |